This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M2424

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क M2424 विषय काव्य

नाव रघुवंश सार

लेखक/लिपीकार बाळभट्ट पुराणिक

पृठ 45 काळ ..... पूर्ण/अपूर्ण

M2424

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



॥ इतिरघुवंशप्रारंभः ॥ रामः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥शारदाशारदांभोजवदनावदनांबुजे॥सर्वदासर्वदास्माकं॥सन्निधिंसन्नि
धिंकुरु॥१॥सइति॥सरघुःगुरुणापित्रायदत्तंराज्यंराज्ञःकर्मप्रजापालनात्मकंपुरोहितादि
स्याचत्॥प्रतिपद्यप्राप्यदिनांतेसायंकालेसवित्रास्रुर्येणनिहितंतेजःप्रतिपद्यछुताशानोऽ
ग्निरिवाऽधिकंबभौसौरंतेजःसायमग्निसंक्रमेआदित्योवाऽस्तंयत्राग्निमनुप्रविशति॥

॥सराज्यंगुरूणादत्तंप्रतिपद्याधिकंबभौ॥दिनांतेनिहितंतेजःसवित्रेवछुताशनः॥१॥श्री
॥दिलीपानंतरंराज्येतंनि।शाम्यप्रतिष्टितं॥सर्वंप्रधुमितोराज्ञांहृदयेऽग्निरिवोत्थितः॥२॥

अग्निंवाऽदित्यसायंप्रविशतित्यादिश्रुतिप्रमाणं॥१॥दिलीपेति॥दिलीपानंतरंराज्येप्रतिष्टितमव
स्थितंतंरघुंनिशाम्याकर्ण्यसर्वंदिलीपकालेराज्ञांहृदयेप्रकर्षेणधूमोऽस्यसंजातःप्रधूमितोऽ
ग्निःसंतापाग्निरुत्थितइवप्रज्वलितइवपूर्वंव्यधितःसंतापोऽभूदित्यर्थः।राजकर्तृकस्या
पिनिशामनस्याग्नावुपचारान्नसमानकर्तृकस्याविरोधइत्यर्घः॥२॥ ॥श्रीराम॥जय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुहूतेति॥पुरुहूतध्वजः इंद्रध्वजः सकिलवृष्ट्यर्थंराजभिः पूज्यत इत्युक्तंभविष्योत्तरे॥एवंयः कुरुतेयात्राभिंद्रकेतोर्युधिष्ठिरपर्जन्यः कामवर्षी स्यात्तस्मिन्संज्येनसंशयइति॥पुरुहूतध्वजस्येव तस्यरघोर्नवाभ्युत्थानमभ्युन्नत्तिमभ्युदयंचनवाभ्युत्थानदर्शिन्यः उर्ध्वंप्रस्थिताउल्लसिताम्र नयनपंक्तयोयासांताः सप्रजाः ससंतानाः प्रजाःप्रजास्यासततौजनइत्युभयत्राप्यमरः। ननंदुः॥ ॥३॥ समिति॥द्विरदइवद्विरदैम्नवागछतीतिद्विरदगामितेनद्विरदगामिनाकर्त्तर्युपमानेसुप

॥पुरुहूतध्वजस्येवतस्योन्नयनपंक्तयः॥नवाभ्युत्थानदर्शिन्योननंदुःसप्रजाःप्रजाः॥३॥ सु
॥न्यस्तशस्त्रेदिलीपंचतंचस्त्रीचाविशांपति॥राज्ञांमुहुतनाराचेहृदिशल्यमिवार्पितं॥४॥
॥सममेवसमाक्रांतंद्वयंद्विरदगामिना॥तेनसिंहासनंपित्र्यमखिलंचारिमंडलं॥५॥ छ
जातावितिणिनिः॥तेनरघुणासमंयुगपद्वयंसमाक्रांतमधिष्ठितं॥कंतद्वयं॥पितुरागतंपित्र्यंपि तुर्यचेतियतप्रत्ययः॥सिंहासनंअखिलअरिणांमंडलंराज्यंच॥५॥अथसिंहासनोरोपणानंतरंतस्य लक्ष्मीसंनिधानमाह।छायेति॥अत्ररघोस्तेजोविरोधेणस्वयंसंनिह॥तयालक्ष्म्याछत्रधारणंकृतमित्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेक्षते। पद्मालक्ष्मीः लक्ष्मीः पद्मालयाः पद्मा कमलाश्रीर्हरिप्रियेत्यर्थः। सास्वयमहृश्याकिल। किलेतिसंभा
वनायाः सतिछायामंडललक्ष्येणकांतिपूजानुमेयेननतुस्वरूपतोदृश्येनछायामंडलमित्यनातयज्ञानं
दृश्यते। छायासूर्यप्रियाकांतिः प्रतिबिंबमनातपइत्ययत्राप्यमरः। तेनपद्मातपत्रेणपद्ममेवातपत्रं
तेनकरणभूतेनसाम्राज्यंभेसाम्राज्यकर्मणिमंडलाधिपत्येदीक्षितमभिषिक्तंतं भेजे। अन्यथा
कथमेताद्दशीकांतिसंपत्तिरितिभेदः॥५॥ संप्रतिसरस्वतीसान्निध्यमाह॥ परिकल्पितेति। सरस्वती

॥छायामंडललक्ष्येणतमदृश्याकिलस्वयं॥पद्मापद्मातपत्रेणभेजेसाम्राज्यदीक्षितं॥५॥
॥परिकल्पितसान्निध्याकालेकालेचवंदिषु॥स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती॥६॥

कालेकालेसर्वेष्वपियोग्यकालेषु। नित्यविप्सयोरितिवीप्सायांद्विर्वचनं। वंदिषुपरिकल्पितसान्निध्या
रुतसान्निध्यानासतिस्तुत्यंस्तोतारंरघुमर्थ्याभिःअर्थादनपेताभिःधर्मपत्यर्थन्यायादितिप्रत्ययः॥
स्तुतिभिःस्तोत्रैरुपतस्थेदेवतावुध्यासृजितवतीत्यर्थः॥ देवतार्थंचैवेनाविष्णुःपृथिवीरितिवाक्योपलाभकत्वा द्ध
त्यनुसंधेयंएवंचसतिउपाद्देवस्रजनासंगतिकरणमित्रकरणपर्यंतिवर्त्तमानादालनेपदंसिध्यति॥६॥ ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्वेति॥ वसुंधरामनुप्रभृतिभिर्मन्वादिभिर्मान्यैः पूज्यैराजभिः भुक्तायापिभुक्तेवेत्यर्थः॥ य
द्यपीत्येवधारणेऽप्यर्थेयदिवार्थेस्यादितिकेचित्। तथापि। तस्मिन्नराज्ञिअन्यपूर्वोयस्यांसा
अन्यपूर्वानभवतीत्यनन्यपूर्वाअनन्योपभुक्तेवासीत्॥ तत्रयमपथिकेवानुरक्तवतीत्यर्थः॥७॥
अत्रकारणमाह॥ सइति॥ हियस्माल्कारणात्सरघुः युक्तदंडतयायथापराधदंडतयासर्व

॥ मनुप्रभृतिभिर्मान्यैर्भुक्तायापिराजभिः॥ तथाप्यनन्यपूर्वैवतस्मिन्नासीद्वसुधरा॥
॥७॥ सहिसर्वस्यलोकस्ययुक्तदंडतयामनः॥ आददेनातितीक्ष्णोछोनभस्यानिवदक्षिणः॥८॥

स्यलोकस्यमनःआददेजहार। कथमिवअतितीक्ष्णोऽत्युग्रोवानभवतीतिनातितीक्ष्णोछः। नञर्थ
स्यसुप्सुयेतिसमासः। दक्षिणोदक्षिणदिग्भवोनभस्यान्वायुरिवमलयानिलयेत्यर्थः॥
युक्तोदंडतयेत्यत्रकामंदः॥ उद्वेजयतीतीक्ष्णोनम्रैर्नृपैरभ्यते॥ दंडेनन्रपतिरतस्माद्यु
क्तदंडःप्रशस्यतइति॥८॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंदेति॥तेनरघुणाप्रजागुरोर्दिलीपेविषयेसहकारोऽतिसौरभंप्रतः॥आम्रम्ऋतोरसा
लोसौसहकारेतिसौरभःइतिअमरः॥तस्यफलेनपुष्पोद्गमेषुप्योदयइवततोपिगुणाधि
कतयाहेतुनामंदोत्कंठाः॥अत्योत्सुकाः।हताःगुणोत्तरोम्रउत्तरोविषयःपूर्वविस्मा
रयतीतिभावः॥९॥नयविद्भिरिति॥नयविद्भिर्नीतिशास्त्रज्ञैःनवेतस्मिन्नराज्ञिविषयेत

॥मंदोत्कंठाःकृतास्तेनगुणाधिकतयागुरौ॥फलेनसहकारस्यपुष्पोद्गमइवप्रजाः९॥
॥नयविद्भिर्नवेराज्ञिसदसच्चोपदर्शिते॥सर्वएवाभवत्सक्षःतस्मिन्नाभवदुत्तरः॥१०॥

॥राम
२

माधिक्यत्यर्थः॥सत्यधर्मसुहृदादिकंअसत्कुठसुहृदादिकंउपदर्शितंतस्मिंराज्ञिसर्वः
पक्षएवाभवत्॥संक्रांतइत्यर्थः॥उत्तरपक्षोनाभवत्संक्रांतइत्यर्थः॥तत्रसदोसतोर्म
ध्येसदेवाभिमतंनासत्ततज्ज्ञानंतुदानार्थमवेत्यर्थः॥पक्षधरोनयोग्यार्थः॥पार्श्व
गस्तत्साध्यंसहायबलमितिषुइत्यमरः॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचानामिति॥ पृथिव्यादीनांपंचानांभूतानामपिगुणाः गंधादयः उत्कर्षमतिशयंपुपुषुः॥ अत्रोत्प्रेक्ष
तेतस्मिन्घोनामनवेमहीपालेसतिसर्ववस्तुजातंनवमिवाभवत्॥ तदेवभूतजातमिदानीमपू
र्वगुणयोगादपूर्वमिवाभवदितिभावः॥ ११॥ यथेति॥ यथायस्मात्प्रह्लादयतीतिप्रह्लादश्चन्द्रः इंदुश्चादि
धातोरौणादिकोरप्रत्ययः। प्रह्लादकारणात्॥ अन्वर्थोनुगतार्थनामकोभूत्॥ यथाचउंतपतीति

॥ पंचानामपिभूतानामुत्कर्षंपुपुषुर्गुणाः॥ नवेतस्मिन्महीपालेसर्वंनवमिवाभवत्॥ ११॥
॥ यथाप्रह्लादनाच्चंद्रः प्रतापात्तपनोयथा॥ तथैवसोभूदन्वर्थोराजाप्रकृतिरंजनात्॥ १२॥

तपनः सूर्यः। नघादित्वाल्ल्युप्रत्ययः॥ प्रतापात्सतापजनानादित्यर्थोऽऽभूदित्यर्थः। तथैवराजाप्रकृति- स२
रंजनादन्वर्थः॥ सार्थकः। राजराड्डोऽभूत्॥ यद्यपिराजराड्डोराजतेर्दीप्त्यर्थोकनिन्प्रत्ययोतोप्यंतइति
यैकप्रत्ययांतः ननुरंजतेः॥ तथापिधातूनामनेकार्थत्वाद्रंजनद्राजेत्यक्तंकवीना॥ अकोनेर्थत्वं
धातूनामनुस्तितिसायाम्नित्यादिपसूत्रप्रामाण्यादवसनीयं॥ १३॥ ७॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामंमिति॥विशालेतस्यरघोर्लोचनेकामंकर्णांतयोर्विश्रांतेकर्णप्रांतगतेस्तअतएवचक्षुष्म
त्तातुचक्षुषःफलमित्यर्थः॥सूक्ष्मान्कार्यार्थान्विचारनिर्णीतकर्त्तव्यार्थान्दर्शयतीप्र
कारायतीतिसूक्ष्मकार्यार्थदर्शीनः तस्यशास्त्रेणैवशास्त्रदृष्टिरेवदृष्टिःसतुविवेकिनामि
तिभावः॥२३॥लब्धप्रशमनमिति॥अथलब्धस्यराजस्यप्रशमनेनपरिपंथिनामनुर

॥कामंकर्णांतविश्रांतेविशालेतस्यलोचने॥चक्षुष्मत्तातुशास्त्रेणसूक्ष्मकार्यार्थदर्शिनः॥२३॥
॥लब्धप्रशमनंस्वस्थमधेनंसमुपस्थिता॥पार्थिवश्रीर्द्वितीयेवशरसंकजलक्षणा॥२४॥

जनप्रतिकाराभ्यांस्थिरिकरणेनस्वस्थः तथाचोक्तं॥राज्यस्थाचिरलब्धस्यप्रशमनंपरिपंथि
नंरंजनकाराभ्यांलब्धप्रशमनंविदुरिति॥ततस्वस्थःस्थास्नुरितिस्वस्थः।तस्मात्सामा
हितंचित्तंएनंरघुंपंकजलक्षणापद्मचिह्नाश्रियोपिविशेषणमेतद्वशरद्द्वितीयापा
पार्थिवश्रीःराजलक्ष्मीरिवसमुपस्थितापाप्ता॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्दष्टेति॥निश्चोषंदष्टाः निर्दष्टाकर्त्तरिक्तः॥अतएवबलघवः तैः लघुभिर्मेघैर्मुक्तवर्त्मात्यक्तमार्गः अतएवसुदुःसहः तस्यरघोर्भानोरुष्णप्रतापः पौरुषमातपस्तस्यप्रतापोयोरुषातपावितियादवः॥युवपत्दिशोव्यानशे॥व्याप॥१५॥वार्षिकमिति॥इदंवर्षासुभवंवार्षिकंवर्षानिमित्तमित्यर्थः॥वर्षाभ्यष्ठगितिठक्प्रत्ययः॥धनुःसंजहार॥संहृतवान्॥रघुःजैत्रंजयंशीलंजेतुरात्मनः

॥निर्दष्टलघुभिर्मेघैर्मुक्तवर्त्मासुदुःसहः॥प्रतापस्तस्यभानोश्चयुगपच्चानशेदिशः॥१५॥
॥वार्षिकंसंजहारेंद्रोधनुर्जैत्रंरघुर्दधौ॥प्रजार्थसाधनेतौहिपर्य्यायोद्यतकार्मुकौ॥१६॥ ८७
॥आधिज्यमायुधंकर्त्तुंसमयोयंरघोरिति॥स्वधनुःशंकितेनेवसंजहेरोमभुना॥१७॥ ८७

तालज्ञादिभ्यश्चेतिस्वार्थेऽणप्रत्ययः॥धनुर्दधौ॥हियस्मात्तावित्रघुप्रजानांअर्थस्यप्रयोजनस्यदृष्टिविषयलक्षणसाधनेविषयेपर्य्यायेणउद्यतेकार्मुकेयाभ्यांतेतथोक्तौ॥प्रर्य्यायोद्यतकार्मुकौ॥पर्यायांतरेतुपर्य्यायेणउद्यमश्चविश्रमश्चयोः तौपर्य्यायोद्यमविश्रमौ॥ इयोःपर्य्यायग्रणादितिभावः॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुंडरीकेति ॥ पुंडरीकं सितं भोजमेवातपत्रं यस्य सः पुंडरीकातपत्रः तथोक्तः पुंडरीकं सितं भोज
मित्यमरः । विकसंतिकाद्यानिकाशारव्यतृणकुसुमान्येवचामराणि यस्य सः तथोक्तः ऋतुरारडु
तुः पुंडरीकमिवातपत्रं काशमिवचामरे तं रघुं विडंबयामास ॥ अनुचकार ॥ तस्य रघोः श्रियेषु
नः शोभांतुनप्राप ॥ शोभासंपत्तिः पद्मासुलक्ष्मीः श्रीरिवदृश्यतेइतिराम्भवतः ॥ २७ ॥ प्रसादेति ॥

॥ पुंडरीतेकोपत्रस्तंविकसत्काराचामरः ॥ ऋतुर्विडंबयामासनपुनः प्रापतश्रियं ॥ १७ ॥ ७ ॥ ॥
॥ प्रसादसुमुखेतस्मिन्नचंद्रेचविशदप्रभे ॥ तदाचक्षुश्चतांप्रीतिरासीत्सप्तमरसाद्वयोः ॥ १८ ॥
॥ हंसश्रेणीषुतारासुकुमुदत्सुचवारिषु ॥ विभ्रतयस्तदीयानांपर्यस्तायइवासवः ॥ १९ ॥ नेत्रवतांपुं

प्रसादेनप्रसन्नतयासुमुखेतस्मिन्नरघौविशदप्रभेनिर्मलकांतौचंद्रेचेति द्वयोर्विषयेतदाचक्षुश्चतांप्रीति ॥ ५
ऋतुरागः । तदासप्तमरसास्वादआसीत् ॥ तुल्यभोग्येतियावत् ॥ स्त्रीगंधरसेस्वादाविति विश्वः ॥ १८ ॥
हंसेति ॥ हंसानांश्रेणीषुतारासुनक्षत्रेषुकुमुदानियेषुसंतिकुमुदंति ॥ कुमुदान्कुमुदप्रायेष्वित्यमरः ॥
कुमुदनडवेतसेभ्योऽनुतुप् ॥ तेषुवारिषुचतदीयानांस्वसंबंधिनांयत्रासोविभ्रतयः संपदः पर्यस्ताइव
न्यसारिताः ॥ किंकिमित्यर्थमेषा ॥ अन्यथाकथमेषाधवलेतिभावः ॥ १९ ॥ ॥ ॥ राम ॥ ॥ श्रीराम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अकुमारकथो ह्यतोयस्मिन्कर्मणि गानक्रियाविशेषणमेतत्॥ स्यादभ्यादानमुह्यातआरंभ इत्यमरः॥२॥
इक्षु गयेति॥ इक्षुणांछायाइक्षुछायाशब्दयोर्वाकुल्येइतिनपुंसकत्वं॥ तत्रनिषण्णाइक्षुछायानिषा
दिन्यः॥ स्त्रिलिंगपाठेइक्षोछायेतिविग्रहः॥ अन्यथाबहुत्वेनपुंसकत्वप्रसंगात्॥ शालीन्गोपायंतिरक्ष
तीतिशालिगोप्यः॥ सस्यपालिकास्त्रियः॥ कर्मण्यकृदिड्डाणञ्भिल्यादिनाडिप्॥ गोषु॥ रक्षकस्यरघोः
गुणेभ्यःउदयोयस्यतद्गुणोदयंगुणोपेतंआकुमारंकुमारादारभ्यकथोह्यातंकथारंभोयस्यतत्कुमा
रैरपिस्त्रियमानमित्यर्थः॥ यशोजगुः गायंतिस्म॥ अथवाकुमारस्यसतोरघोः याःकथाइंद्रविजया
॥ तस्यगोषुद्विरेफाणांकर्णोत्पलनिपातिनां॥ स्वरसंवादिभिःकंठैःशालिगोप्योजगुर्यशः॥२०॥ ७॥
॥ इक्षुछायानिषादिन्यस्तस्यगोषुगुणोदयं॥ आकुमारकथोद्यातंशालिगोप्योजगुर्यशः॥२०॥ ७॥
॥ प्रसादेहेत्यादंभः कुंभयोनेर्महौजसः॥ रघोः परिभवाशंकिचिह्नंद्विषतांमनः॥ २१॥ ७॥
दयः ततःआरभ्यकुमारकथंतत्रापिविधावव्ययीभावः॥ आकुमारकथोद्रुमितमिपाठेकुमारस्यसतस्य
कथामिंद्रत्रैलोक्यविजयिनोरघोःतद्वंशआरभ्ययशोजगुरितिव्याख्येयं॥ २०॥ प्रसादेति॥ महौजसःकुंभयोनेरग
स्यस्यअगस्तः॥ कुंभसंभवः इत्यमरः॥ उदयादभ्रःप्रसादःप्रसन्नंभवत्यरघोरुदयादभिभवाशंकिद्विषतांमनः॥ च
क्षुभेकालुष्यंप्रापाअगस्योदयेजलंप्रसीदतीत्यागमः॥ उदयेचमुनेरगस्यनाम्नःकुसुमायोगमलप्रहर्षितामि
द्दृदयानिसतामिंद्रस्यभावास्कनरंजूनिभवंतिनिर्मलानि॥ २१॥ श्रीरामजयरामजयजयराम॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदीनां पीड्यंति

मदेति॥ मदोद्गत्राः मदोद्धताः ककुद्देषामस्तीति ककुन्मंतः महाककुद इत्यर्थः। यवादित्वान्मकारस्यवत्वा
भावः। सरितांकुलानिउद्भुजंतीतितिकुलमुद्भुजाः। उदिकूलेरुजिवहोरितिरक्प्रत्ययः। अरुर्द्विषेत्यादि
नामुमागमः। महांतउक्षाणमहोक्षाः। अचतुरेत्यादिनानिपातनात आकारांतत्वं॥ लीलारवेलंविला
ससुभगंतस्यरघोरुत्साहवतोवयुष्मंतः परभंजकस्यविक्रमंशौर्यंतेमनुप्रापुः अनुचक्रुः॥ २१॥ प्र
सवैरिति॥ मदस्येवगंधोयेषांतैर्मदगंधिभिः॥ उमानाम्नेतिसमासांतइकारः। सप्तपर्णानांवृक्षवि

॥ मदोद्गत्राः ककुन्मंतः सरितांकुलमुद्भुजः॥ लीलारवेलमनुप्रापुर्महोक्षास्तस्यविक्रमं॥ २१॥ ७॥
॥ प्रसवैः सप्तपर्णानांमदगंधिभिराहृताः॥ अस्त्ययेवतेन्नागाः सप्तधैवप्रसुस्रुवुः॥ २२॥ ७

रोषाणांसप्तपर्णोविशालत्वक्क्षारदाविषमच्छदइमः। प्रसवैःपुष्पैःआहृतास्तस्यरघोर्नागाः गजोगजो ॥६॥
विनागमातंगावित्यमरः॥ अस्त्ययेवआहृतनिमित्तयास्पर्द्धयेवपरोत्कर्षंसंहृत्यमस्त्यापरिकीर्ति
तमितियादवः। सप्तधैवप्रसुस्रुवुः॥ मदंवदृषुः॥ प्रतिगजगंधाभिमानादिदिभावः॥ करात्कटाभ्यामेद्र
श्नेत्राभ्यांचमदश्रुतिरितिपालकाव्येकरान्नासाकंधाभ्यामित्यर्थः॥ २२॥ ॥७॥ ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रित सँइति॥ सरितोगाधाः तलस्पर्शाः सुप्रतराः कुर्वतीपथोमार्गम्त्रआश्रयानकर्दमान्॥ षुष्कपंकान्कुर्वती संयोगादेरातोधातोर्यण्वतः इतिश्रयतेनिष्ठानत्वं॥ प्रातरश्रारत्रारद्रुतः॥ तंरघुराक्तेरुत्साहश्यक्तेः प्रथमंप्राक्यात्रायेदंडयात्रायेचोदयामास॥ प्रेरयामास॥ प्रभुमंत्रशक्तिसंपन्नस्यतस्यत्रारत् स्वयमुत्साहद्। यामासेत्यर्थः॥ २४॥ तस्माइति॥ वाजिनांमश्वानांनीराजनाविधौनीराजनारब्धेशां

॥ सरितःकुर्वतीगाधाः पथश्राश्रयानकर्दमान्॥ यात्रायेप्रेरयामासतंरात्रेः प्रथमंरारत्॥ २४
॥ तस्मैसम्यक्हुतोवह्निर्वाजिनीराजनाविधौ॥ प्रदक्षिणार्च्यर्जिनहस्तेनेवजयंददौ॥ २५॥ ७॥

तिकर्मणिसम्यग्विधिवत्हुतोहोमसमिद्धोवह्निः प्रगतादक्षिणंतिष्ठ त्युप्रभृतित्यादव्ययीभावः॥ प्रदक्षिणंअर्चिःज्वालातस्यव्याजेनहस्तेनेवतंस्मैजयंददौ॥ उक्तंमाघयात्रायांप्र इंद्रप्रदक्षिणगतो हुतभुक्कन्यपस्यधात्रीसमुद्ररसनांवराणांकरोतीतिवाजिग्रहणंगजादीनामुप्युपलक्षणंतेषांमपि नीराजनविधानात्॥ २५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति॥ गुप्तमूलंस्वनिवासस्थानंप्रत्यंतःप्रांतर्दुर्गयेनसगुप्तमूलप्रत्यंतःशुद्धपार्ष्णिरुद्धतदृष्टराजु
सेनयारक्षितदृष्टदेशोवाअयान्वितः॥शुभदैवान्वितः॥अयःशुभावहोविधिरित्यमरः।सरघुःषड्वि
धंसैन्यंबलंभृत्यादिरूथंबलंसैन्यं।मौलंभृत्यंसुहृत्श्रेणीद्विषदाटविकंबलमित्यमरः॥आदायादि
ग्विजीषयाजेतुमिच्छयाप्रतस्थे॥अत्रकामंदकः॥पुरःप्रसर्पन्नपिशुद्धदृष्टःप्राप्नोतितीव्रंबलु
पार्ष्णिभेदः॥यास्यन्पुरारक्षमनेकदुर्गमनेकमुख्येचबलंविदध्यात्॥देवानभ्यर्च्यविप्रांश्चप्रस्थि

॥सगुप्तमूलपर्यंतःशुद्धपार्ष्णिरयान्वितः॥षड्विधंबलमादायप्रतस्थेदिग्जिगीषया॥२६॥ ७
॥अवाकिरन्वयोवृद्धास्तंलाजैःपौरयोषितः॥दृषतैःमंदरोद्भूतैःक्षीरोर्मयइवाच्युतं॥२७॥

ग्रहतारकाः॥षड्विधंतुबलमूह्यंद्विषताभिमुखंव्रजेत्॥२६॥अवाकिरन्निति॥वयसोवृद्धाःवयो
वृद्धाः।पौरयोषितःतंरघुंप्रयांतंलाजैःआचारलाजैःमंदरोद्भूतैःदृषतैःबिंदुभिःक्षीरोर्मयः
क्षीरसमुद्रोर्मयः॥अच्युतंविष्णुमिवअवाकिरन्पर्यक्षिपन्॥२७॥ ॥श्रीराम॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति॥ प्राचीनबर्हिर्नामकश्चिन्महाराजइतिकेचित्॥इंद्रः पर्जन्योमघकाद्दृष्टिषाहरिहय
प्राचीनबर्हिस्तयेतींद्रपर्यायेषुहलायुधाभिधानात्॥तेनतुल्यः सरघुःअनिलेनानुकूलवातेनऊ
दूतैःपुरःप्रसारितैः केतुभिःध्वजैःअहितान्रिपुंतर्जयन्निवभत्सेयन्निवतर्जनभत्स्योरनुदात्तत्वेपिचक्षिङ्ङे

॥सयथोप्रथमंप्राचीतुल्यःप्राचीनबर्हिषा॥अहिताननिलोदूतैस्तर्जयन्निवकेतुभिः॥२८॥
॥रजोभिःस्यंदनोदूतैर्गजैश्चघनसंनिभैः॥सुवस्तलमिवव्योम कुर्वन्व्योमेवभूतलं॥२९॥

ङिःकरणेनानुदात्तत्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्तस्मैपदमिति वामनः॥प्रथमंप्रा
चीदिशांययौ॥२८॥रजोभिरिति॥किंकुर्वन्स्यंदनोदूतैः रजोभिः॥घनसंनिभैर्वर्णतःक्रियातःपरि
माणश्चमेघतुल्यैर्गजैश्चयथाक्रमंव्योम आकाशंसुवस्तलमिवभूतुल्यं भूतलंव्योमेव
कुर्वन्ययाविति पूर्वेणसंबंधः॥२९॥ ॥५ ॥५ ॥५ ॥५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतापस्तु ॥अग्नेप्रतापस्तेजोविशेषः॥ सप्रतापसप्रभावश्चयतेजः कोशदंडजमित्यमरः॥ततः
राट्सेनाकलकलः॥ तदनंतरंपरागोधूलिः॥परागेपुष्परजासिध्वलिरथानीयथारपीतिवि
श्वः॥पश्चाद्रथाश्वादिकंचतुरंगबलइतीदंचतुस्कंधेवचतुर्व्यूहेवसाचमूश्चयौ॥स्कंधावस्त्र
प्रकांडेचसेनासमुदायेपिचेत्यमरः॥रथानीकमितिपाठेइतिराड्ध्याहारेणयुज्यतां॥३॥

॥प्रतापोग्नेततःराट्परागास्तदनंतरं॥ययौपश्चाद्रथानीकंचतुस्कंधेवसाचमूः॥३०॥
॥मरुत्पृष्टान्युदंभांसिनाव्याःसुप्रतरानदीः॥विपिनानिप्रकाशानिशक्तिमत्साचकारसः॥३१॥

मरुदिति॥सरघुःशक्तिमत्सामर्थ्यात्॥मरुत्पृष्टानिनिर्जलस्थानानि।समानोमरुधन्वा
नावित्यमरः॥नौर्वयोधर्मविषमलेत्यादिनायप्रत्ययः॥सुप्रराःसुखेनतार्योम्रकारविपिना
उदंभांसिउद्भूतजलानिचकार॥नाव्याःनौभिस्तार्यानदीः॥नाव्यंत्रिलिंगनौतार्यइत्यमरः॥नि
अरण्यानि॥अरण्यंविपिनंगहनंकाननंवनमित्यमरः॥प्रकाशानिनिर्दग्धानिचकारतस्याग
म्यकिमपिनास्तिइतिभावः॥३१॥

॥राम॥ ॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति॥महतींसेनांपूर्वसागरगामिनींकर्षन्नसःरघुः हरस्यजटाभ्यांभ्रष्टांगंगांकर्षन्॥सापिपूर्व
र्वसागरगामिनींभगीरथइववभौ॥भगीरथोनामकश्चिक्षपिलदग्धानांसागराणानसात
त्यावनायहरकिरीटात्गंगाप्रवर्त्तयितारजासंबंधात्गंगाचभागीरथीतिगीयते॥३२॥
त्याजितैरिति॥फलंलभंवक्षपक्षेप्रसवंचत्याजितै॥त्यज्यैर्णिजंतात्हिकर्मकात्॥अप्रधानेक

॥ससेनांमहतींकर्षन्पूर्वसागरगामिनीं॥बभौहरजटाभ्रष्टांगंगामिवभगीरथः॥३२॥
॥त्याजितैफलमुत्खातैःभग्नैश्चबहुधान्तपैः॥तस्यासीदुल्बणोमार्गःपादपैरिवदंतिनः॥३३॥
॥पुरोगैःकलुषास्तस्यसहप्रस्थायिभिःहरैः॥पश्चात्प्रयायिभिःपंकाश्चक्रिरेमार्गनिम्नगाः॥३३॥

र्मणिक्तः॥उत्खातैः॥अहतैःस्वपदात्च्यावितैःअन्यत्रोत्पादितैर्बहुधाभग्नैः॥अनोजितैः॥
अन्यत्रच्छिन्नैःन्नपैःपदपैश्चदंतिनोगजस्येवतस्यरघोःमार्गः॥उल्बणः॥प्रकाराःअसीत्॥
प्रकारांप्रकटस्पष्टमुल्बणंस्फुटमितियादवः॥३३॥ ॥ ७॥ ॥ ७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौरस्यानिति॥जयीजयनशीलः॥जितक्षिविश्रीरवमेत्यादीनाइतिप्रत्ययः॥सर्वेषुरेवपुरोभवान्पौर
स्यान्प्राच्यान्दक्षिणापश्चात्पुरस्सरस्यगितित्यकप्रत्ययः॥तांस्तान्सर्वानित्यर्थः॥वीप्सायांद्वित्व
क्तिः॥जनपदान्देशान्आक्रामन्तालीवनैःश्यामंमहोदधेरुपकंठंअंतिकंप्रापउपकंठांतिका
भ्यर्णमित्यमरः॥३४॥अनम्राणामितिअनम्राणांकर्मणिषष्ठी॥समुद्धर्तुंसमूलंउन्मूलयितुंतस्मा

॥पौरस्यानेवमाक्रामंस्तांस्तान्जनपदान्जयी॥प्रापतालीवनश्यामंमुपकंठंमहोदधेः॥३४॥
॥अनम्राणांसमुद्धर्तुंतस्मात्सिंधुरयादिव॥आत्मासंरक्षितःसुह्मेवृत्तिमाश्रित्यवेतसीं॥३५॥

द्रघोःसकाशात्॥भीत्यार्थानांभयहेतुरितिअपादानत्वापंचमीसिंधुरयान्नदीवेगादिवसुह्मैः
सुह्मदेशीयैः॥सुह्मादयोराढाजनपदवाचिनः॥क्षत्रियाचक्षते॥वेतसीवेतससंबंधिनीवृत्तिं
प्रणतिमित्यर्थः॥आश्रित्यआत्मासंरक्षितः॥अत्रकौटिल्यः॥बलीयसाभियुक्तोदुर्बलः॥स
र्वत्रानुप्रणतीवेतसधर्ममातिष्ठते॥३५॥ श्री ॥छ॥ राम ॥छ॥ जय ॥

॥ राम ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वंगानिति॥नेतानायकः।सरघुः नौभिः साधनेरुद्धतान्सन्नद्धान् वंगान्राज्ञः ससाबलेन। तरसाब
लरहसीतियादवः।उत्खायोन्मूल्य गंगायास्त्रोतसांप्रवाहाणामंतरेषु द्वीपेषुजयस्तंभान्निच
रवानस्थापितवान्इत्यर्थः॥३६॥आपादेति॥आपादपद्मंअङ्घ्रिपद्मपर्यंतं।प्रणताःअतए
एउत्खाताः पूर्वमुद्धताःअपिप्रतिरोपिताः पश्चात्स्थापिताः तेवंगाः शालयः कमलाघाम्रषष्ठी

॥वंगानुत्खाय तरसानेतानोसाधनोद्धतान्॥निचखानजयस्तंभान् गंगास्त्रोतोंतरेषुसः॥३६॥
॥आपादपद्मप्रणताः कलमाइवतेरघुं॥फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः॥३७॥

काघम्रपुसित्यमरः॥कलमाइवशालिविशेषाइवतोप्यापादपद्मंमूलंपद्मपर्यंतंपादोबुध्नतुरी
यांशः शैलप्रत्यंतपर्वतइतिविश्वः॥उत्खातप्रतिरोपिताम्ररघुंफलैर्धनैः अन्यत्रसस्यैः संव
र्धयामासुः॥फलंफलेधनेबीजेनिष्पत्तौभोगलाभयोः॥ सस्यइतिकेशवः॥३७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति। स्मरघुर्बद्धा हिरदा एव सत्वे॥ यैस्तैः सैन्यैः कपिशां नाम नदीं करभामिति केचित् सटंति तीर्त्वा उत्क
लैराजाभिर्दर्शितपथाः संदर्शितमार्गः सन्कलिंगाभिमुखोययौ॥ २८॥ सइति॥ स्मरघुर्महेंद्रस्यबु
लपर्वतविशेषस्यमहेंद्रोमलयः सह्यः शुक्तिमन्ऋक्षपर्वतः॥ विंध्यश्चपारिपात्रश्चसप्तात्रकुलपर्वताइति॥ वि
ष्णुपुराणे॥ मर्द्धितीक्ष्णंदुः सहंप्रतापंयंतासारथिर्गंभीरवेदिनोहिरदस्यगजविशेषस्यमर्द्धितीक्ष्णंनिशितमं
कुशमिवन्येवेद्यायेदंनिक्षिप्तवान्॥ सगंभेदो घ्राणितस्रवान्मांसस्यव्यधनादपिआत्मानंयोनजानातिस

॥ सतीर्त्वाकपिशां सैन्यैर्बद्धाहिरदसेतुभिः॥ उत्कलादर्शितपथः कलिंगाभिमुखोययौ॥ २८॥ ७
॥ सप्रतापंमहेंद्रस्यमर्द्धितीक्ष्णंन्यवेद्यायत्॥ अंकुशंहिरदस्येव यंतागंभीरवेदिनः॥ २९॥ ७
॥ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनैः॥ पक्षच्छेदोद्यतंरुद्धं शिलावर्षीव पर्वतः॥ ३०॥ ७

स्याद्गंभीरवेदिनः॥ इति॥ राजपुत्रीयोचीरकालेनयोद्धेतीक्ष्णांपरितामपि। गंभीरवेदिर्विज्ञेयः सगजो राम
गजवेदिभिरितिस्मगच्चर्मणीयो॥ २९॥ प्रतिजग्राहेति॥ गजसाधनः सन्कालिंगः कलिंगानांराजा॥ ॥१०॥
ह्यत्रमगधकलिंगस्तरमसादणित्यण्प्रत्ययः॥ अस्त्रैरायुधैस्तंरघुंपक्षाणांछेदेउद्यतं।
उद्युक्तंशिलावर्षीवप्रर्वतइवप्रतिजग्राहअभियुक्तवान्॥ ३०॥ ॥ राम॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विषामिति॥काकुत्स्थोरघुः तत्रमहेंद्रादौद्विषांनाराचदुर्दिनं।नाराचानांकूर्चिकाकृतबाणविशेषाणां
दुर्दिनंलक्ष्यैयावर्षमुच्यतेमेघछद्मेहिदुर्दिनंमित्यमरः॥विषह्यसहित्वायथाशास्त्रंसन्मार्ग
लस्नातइवविजयमंगलार्थंअभिषिक्तइवजयश्रियंप्रतिपेदे॥प्रापः।यत्तुसर्वौषाधिस्नानंतन्मां
गल्यमुदिरितमितियाज्ञवल्क्यः॥८१॥तांबूलीनामिति॥तत्रमहेंद्रेयुध्यंतेइतियोधाः॥पंचाद्यच्।
सरिताःकल्पिताःआपानभूमयःपानयोग्यप्रदेशाः।आपानंपानगोष्ठिकेत्यमरः॥येस्तेनतयोक्ताः

॥द्विषांविषह्यकाकुत्स्यस्तत्रनाराचदुर्दिनं॥सन्मंगलस्नातइवप्रतिप्रेदेजयश्रियम्॥८२॥
॥तांबूलीनांदलैस्तत्ररचितापानभूमयः॥नारिकेलासवंयोधाःशास्त्रवंचेपयुर्यशाः॥८२॥ध्व
॥गृहीतप्रतिमुक्तस्यसधर्मविजयीनृपः॥श्रियंमहेंद्रनाथस्यजहारनतुमेदिनीम्॥८३॥

संतःनारिकेलासवंयोरिकेलमद्यंताबूलीनांनागवल्लीनांदलैःपर्णैः।तत्रविजह्रुरित्यर्थः।शास्त्रवंश्यानुसंबं
धियशस्विनपुरुषान्प्रतिउद्दिश्यकर्मणेनतदियंयशोपितत्रजह्रुरित्यर्थः॥८२॥गृहीतमुक्तस्येति॥धर्मविज
यीधर्मार्थंविजययशीलः॥सन्नृपोरघुः गृहीतश्चासौप्रतिमुक्तश्चगृहीतप्रतिमुक्तः तस्यमहेंद्रनाथस्यका
लिंगस्यश्रियंजहारधर्मार्थमितिभावः।मेदिनींतुनजहारशरणागतवात्सल्यादितिभावः॥८३॥ राम॥श्र

संपत्तिश्रीश्चलक्ष्मीश्चेत्यमरः।१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत इति ॥ ततः प्राचीविजयानंतरं ॥ फलवत्सगमालिनाफलीतरुमुकश्रेणीमतान्वीह्यादित्वादिनिप्रत्ययः। स५
वेलायाः समुद्रकुलस्यतटेनोपांतेनैवागस्त्येनाचरितामाशांदक्षिणांदिशंअनाधृष्यस्यजयःअयत्न
सिद्धत्वात्। आप्रार्धनीयजः सन्ययौ॥ अगस्त्योदक्षिणामाशामाक्रम्यनभसिस्थितः। वरुणस्यात्मजो
योगीविंध्यवातापिमर्दनइतिब्रह्मपुराणे॥ ५४॥ सइति॥ सरघुः गजानांदानेनमदेनसुगंधिनासुरभिगंधि
ना। गंधस्येत्यादिनाइकारादेशः समासांतःयद्यपिगंधस्येत्येतदेकांतग्रहणंकर्तव्यमिमिनेसर्गिकंवि

श्री ॥ ततोवेलातटेनैवफलवत्सगमौलिना॥ अगस्त्याचरितामाशामनाधृष्यस्यजोययौ॥ ५४॥ श्री
॥ सस्सैन्यपरिभोगेगजदानसुगंधिना॥ कावेरीसरितांपत्युः शंकनीयामिवाकरोत्॥ ५५॥॥

वस्यायामेवेकारादेशः तथापिनिरंकुशाः कवयः तथामाघकाव्ये। ववुरयुक्छदयुंछसुगंधयः। सत
तगास्सततगानगिरौलिभिःनैषधेच॥ अपोहितुंसायनवारिधाराः स्यादः सुगंधिः स्यदतेतुषारैतिनक ॥राम
र्मधारयान्मत्वर्थीयः। इतिनिषेधादिनिप्रत्ययः॥ पक्षोधिजघन्यएव॥ सेनायांसमवेताः सैन्याः सेना ॥११॥
यांसमवेतायेसैन्यास्तेसैनिकाम्रतेइत्यमरः॥ सेनाययावेतिण्यप्रत्ययः॥ सैन्यानांपरिभोगेन
कावेरीनामसरितांपत्युः समुद्रस्यशंकनीयामविश्वसनीयामिवाकरोत्॥ संभोगलिंगदर्श
नात्॥ भर्तुरविश्वासोभवतीतिभावः॥ ५५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नलेरिति॥ विजिगीषोः विजेतुमिछोर्गतोर्ध्वनस्तस्यरघोर्बलेः सैन्येबलशक्तिर्बलसेन्यमि
यादवः॥मरीचेषुमरीचवनेषुउद्भ्रांताः परिभ्रांताः पक्षिविशेषायासुताः तेषांविशेषाहरितोम
हुकारंडवप्लवाइत्यमरः॥मलयाद्रेरुपत्यकाआसन्नभूमयः॥उपत्यकाद्रेरासन्नाभूमिरूर्ध्वम
धित्यकेत्यमरः॥उपाधिभ्यांत्यकन्नासन्नारूढयोः इतित्यकन्प्रत्ययः॥अध्युषिताः उपत्यका

बल्लेरध्युषितास्तस्य विजिगीषोर्गताध्वनः॥मारिचोद्भ्रांतहारिताः मलयाद्रेरुपत्यका॥७६॥
॥ससंजुरश्चक्षुण्णानामेलानामुत्पतिष्णवः॥तुल्यगंधिषुमत्तेभकटेषुफलरेणवः॥७७॥
॥आजानेयखुरक्षुण्णंपक्वैलाक्षेत्रसंभवं॥व्यानशेसपदिव्योमकीढकोत्थाविलंरजः॥७८॥

सूषितमित्यर्थः॥उपान्वध्याङ्वसइतिकर्मत्वं॥४६॥संसंजुरिति॥अभ्वैः क्षुण्णानामेलानांमेलाल
तानांउत्पतिष्णवः॥उत्पतनशीलाः॥अलंकृञित्यादिनाइष्णुच्प्रत्ययः॥फलरेणवःफलरजोसितु
ल्यगंधिषुसमानगंधिषु॥सर्वगंधनीतिवदिनंताबहुव्रीहिः॥मत्तेभानांकटेषुगंडेषुससंजुःसक्ताः
गजगंडाकटीकटावित्यमरः॥४७॥राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोगीति॥ चंदनानां चंदद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनानां निम्नेषु समर्पितं सजितं त्रिपदि छेदिनां पादघ्नैरवलछेदकानामपि त्रिपदी पादबंधनमिति यादवः॥ करिणां ग्रीवा सुभगंग्रैवेयकं कंठबंधनं ग्रीवाभ्योऽण चेत्यणप्रत्ययः॥ नास्त्रं सत्कृतं स्त्रस्तमभूत्॥ दुह्योलुङीति परस्मैपदं। पुषादित्वादङ्। अनिदितामिति नकारलोपः॥ ८॥ दिशीति॥ दक्षिणस्यां दिशि रवे

॥ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं॥ नास्त्रसत्करिणां ग्रैवं त्रिपदीछेदिनामपि॥ ८॥॥
॥ दिशिमंदायतेतेजो दक्षिणस्यां रवेरपि॥ तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे॥ ९॥

रपितेजोमंदायतेमंदंभवति। लोहितादित्वात्क्यप्॥ वाक्यषइत्यात्मनेपदं। दक्षियेणोनेतेजोमांद्या ॥रामा॥
दितिभावः। तस्यामेवदिशिपांड्याः पंडूनांजनपदानांराजानः पांड्याः। पांडोरपत्यंत्रिषुवक्तव्यः र ॥१२॥
घोः प्रतापंनविषेहिरे॥ नसोढवंतः सूर्यविजयीनोपिविजितवानितिनायकस्यमहानुत्कर्षोगम्यते॥ ९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताम्रपर्णीति॥ तेपांज्ञाः ताम्रपर्णीन द्यासमेतस्यसमेतगस्यमहोदधेः दक्षिणोदधेसंबंधिसंचि
तंमुक्तसारंमौक्तिकवरसारोबलेस्थिरोचिन्याय्ये क्लीबंवरेत्रिषु इत्यमरः। स्वंस्वकीयंसंचि
तं यज्ञाइवतस्मैरघवेनियत्यप्रणिपत्यददुः। यत्रासः शुभ्र त्यादौपम्यंताम्रपर्णीसंगमेनौ
क्तिकोत्पत्तिरितिप्रसिद्धं॥ ५०॥ सइति। असह्येतियुग्ममेत। असह्यविक्रमः सरघुः तदेषु
सानुषु आलीढचंदनोव्याप्तचंदनाद्रुमोस्तनपक्षेप्रांतेषु व्याप्तचंदनानुलेपोतस्याः दक्षिण

॥ताम्रपर्णीसमेतस्यमुक्तासारंमहोदधेः॥ तेनिपत्यददुस्तस्मैयज्ञाः स्वमिवसंचितं॥ ५०॥
युग्मं॥ स्तनिर्वित्र्यय थाकामंतटेषालीढचंदनोस्तनाविवदिशास्तस्याः रौलोमलयददुरौ॥ ५१
॥असह्यविक्रमसह्यं दूरमुक्तमुक्तमुदन्वता॥ नितंबमिवमेदिन्याः सह्यस्तांशुकमलंघयत्॥ ५२

स्याः दिशः। स्तनाविवस्थितौमलयददुरौनामशैलोयथाकामंयथेष्टंनिर्वित्र्यउपभुज्यनिर्वित्र्योभ्रति
भोगयोरित्यमरः। उदकान्यस्यसंतित्युदन्वान्। उदधिःउदन्वानुदधिःसिंधुरित्यमरः उदन्वानुदधौ। चे
तिसमासः। उदन्वतादूरान्मुक्तं दूरस्थक्तः। स्तोकांतिक्कृच्छ्रार्थेषु। ल्युणिन्यतेनेसमासः। पंचम्यास्तोकादिभ्यइ
त्यलुक्। सह्यस्तांशुकमेदिन्याः नितंबमिवस्थितंसह्यंसह्याद्रिं अलंघयत्प्राप्तः। अतिक्रांतोवा॥ ५१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रतिप्रतीचीजयदिशिमभिययावित्याह॥तस्येति॥अपारांतानांपाश्चात्यानांजनपदानांजयेऽधतेऽद्युक्तैः
अपरांस्तोतोपाश्चात्यास्तेचसूर्यारकादयश्चयादवः॥विसर्पद्भिःगच्छद्भिस्तस्यरघोरनीकैःसैन्यैःअनीकं
तुरणेसैन्यइतिविश्वः॥अर्णवःसमुद्रोरामस्यजामदग्न्यस्यास्त्रेरुत्सारितोऽपसारितोपिसह्यलग्न
इवासीत्॥सैन्यंहितीयोऽर्णवइवहरयतइतिभावः॥५१॥भयेति॥तेनरघुणाभयेनोत्सृष्टविभूषणां
प्रतिहतभूषणानांकेरलयोषितामलकेषुचमूरेणुःसेनारजःचुर्णस्यकुंकुमादिरजसःप्रतिनिधी

॥तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः॥रामास्त्रोत्सारितोप्यासीत्सह्यलग्नइवार्णवः॥५२॥
॥भयोत्सृष्टविभूषाणांतेनकेरलयोषितां॥अलकेषुचमूरेणुश्चूर्णप्रतिनिधीकृतः॥५३॥
॥मरुलामारुतोद्धूतमगमत्केतकंरजः॥तद्योधवारबाणानांमयूरपटवासतां॥५४॥
॥कृतः॥येतेनयोषितांपलायनचमूनांतदनुधावनंचधन्यते॥५२॥मरुलेति॥मरुलानांकेरलदेशेषु
केचिन्दीमुरचीयंते॥तस्यामारुतेनाद्धूतंउत्थापितंकेतकंकेतकीसंबंधिरजःतद्योधवारबाणानां
रघुभटकंचुकानां॥भटोयोधेभ्रयोद्धाइत्यमरः॥कंचुकोवारबाणोऽस्त्रीत्यमरः॥अयूरपटवासतां
मयूरसिसिद्धवस्त्रवसनाद्रव्यत्वमगमत्॥पिष्टातःपटवासकइत्यमरः॥५४॥श्रीराम॥श्री

॥ राम ॥
॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभ्यभ्रयेति। चरतांगच्छतांवाजिनांहयानांवाजिवार्हैर्वगंधर्वहयसैंधवसप्तयइत्यमरः॥ गात्र
सिंजितैःगात्रेषुत्रासापमानैःकर्त्तरिक्तः। संजितेरितिपाठः संजतेण्यंताल्कर्मणिक्तः॥वर्मभिः
कवचैःपवनेनोद्धूतानांकंपितानांराजतालीवनानांतृणराजाह्वयस्तालइत्यमरः॥ध्वनिः
स्वनःअभ्यभ्रयतेतिरस्कृतः॥५५॥ खर्जूरीति॥खर्जूरीणांतृणद्रुमविशेषाणां। खर्जूरः

॥अभ्यभ्रयतवाहानांचरतांगात्रसिंजितैः॥मर्मरःपवनोद्धूतराजतालीवनध्वनिः॥५५॥
॥खर्जूरीस्कंधनद्धानांमदोद्धारसुगंधिषु॥कटेषुकरिणांपेतुःपुन्नागेभ्यःश्रिलीमुखाः५६

केतकीतालीखर्जूरीतृणद्रुमइत्यमरः। स्कंधेषुप्रकांडेषु।अस्त्रीप्रकांडःस्कंधस्यान्मूलघारवावधे
स्तरोरित्यमरः॥नद्धानांबद्धानांकरिणांगजानांमदोद्धारेणमदस्त्रावेणसुगंधिषुगंधस्येत्यादि
नाइकारःकटेषुगंडेषुपुन्नागेभ्यःपुन्नागपुष्पाणिविहायस्त्यल्वोपपंचमी॥पुन्नागेपुरुषेस्तामः।
केसरोदेवल्लभइत्यमरः॥श्रिलीमुखाःअलयःपेतुःपतंतिस्म॥अलीवाणोश्रिलीइत्यम
रः। ततोप्यधिकसौगंध्यादितिभावः॥५६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवकाशमिति॥ उदन्वान् उदधिः॥ रामायजामदग्न्यायऽभ्यर्थितोयाचितेसन्नवकाशांस्था
नंददौकिलेतिप्रसिद्धावित्यर्थः॥ रघवेअपरांतमहीपालव्याजेनकरंबलिंददौ। बलिहस्तांश्च
वःकराइत्यमरः॥ अपरांतानांसमुद्रमध्येदेशात्तैर्दत्तेकरेसमुद्रदत्तत्वोपचारः॥
करदानंचभीत्यानतुयाच्ञ्यायतिरघोराभ्योदुत्कर्षः॥ ५७॥ मत्तेभइति॥ तत्ररघुर्मत्तानां

॥ अवकाशंकिलोदन्वान् रामायाभ्यर्थितोददौ॥ अपरांतमहीपालंव्याजेनरघवेकरं॥ ५७
॥ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं॥ त्रिकूटमेवनगरोद्ध्यैर्जयस्तंभंचकारसः॥ ५८॥

इभानांमत्तगजेंद्राणांरदनोत्कीर्णान्यभिदंतक्षतान्येवभावेक्तः॥ व्यक्तानिस्फुटानिविक्रमलक्ष
णानिपराक्रमचिह्नानिविजयवर्णावलिस्थानानियस्मिन्तंतथोक्तं॥ त्रिकूटमेवोद्ध्येजय
स्तंभंचकारगाढप्रकारस्त्रिकूटोद्रिरेवोत्कीर्णस्तंभइवरघोर्जयस्यजपकोऽभूदित्यर्थः॥ ५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारसिकानिति॥ ततः सरघुः संयमीयोगीतत्त्वज्ञानेनइंद्रियारव्यान् इंद्रियनामकान्रिपून्
पारसिकान्राज्ञोजेतुंस्थलंवर्त्मनाप्रतस्थेनतुनेदिष्टेनापिजलपथेनसमुद्रयानस्यनिषि
द्धत्वादितिभावः॥ ५१॥ यवनीनामिति॥ सरघुः यवनीनांयवनस्त्रीणांजातेरस्त्रीविषया
दितिङः प्रसूतवानिपद्मानिवमुखपद्मानिउपमितिसमासः॥ तेषांमधुमदेनयोमदोमद

॥पारसिकान्ततोजेतुंप्रतस्थेस्थलवर्त्मना॥ इंद्रियारव्यानिवरिपुंस्तत्त्वज्ञानेनसंयमी ५१।
॥ यवनीमुखपद्मानांसेहेमधुमदंनसः॥ बालातपमिवाज्ञानांमकालजलदोदयः। ६०।

रागः। कार्यकार्यकारणयोरभेदेननिर्देशः तंनसेहेकथमिवअकालेप्रवृट्व्यतिरिक्तकालेज
लदोदयः। प्रारब्धियद्यनिकासस्याऽप्रसक्तत्वादज्ञानांसंबंधिनाबालातपमिवअज्ञाहि
तस्यादज्ञसंबंधित्वंसोरातस्यबालातपस्तुकिंजल्पकतरुणादित्यतेजसीत्यभिधानचिंतामणिः॥ ६०।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संग्राम इति॥तस्यरघोरश्वसाधेर्वाजिसैन्येः साधनंसिद्धसैन्ययोः उपायगमेमेदेनिष्टत्तोकारकेवधे॥६१॥
यतेन्द्रपसंस्कारेप्रमाणेगमवधतेइतिहेमः। पश्चाद्वैः पाश्चात्यैः। यवनैः सहदक्षिणापाश्चात्यासुरसस्य
क्सहार्थेतृतीया॥ शृंगाणांविकाराः शार्ङ्गाणिधनूंषि।तेषांकूजितैः रावैः अथवाशार्ङ्गैः शृंगसंबंधिभिः कू
जितैर्विज्ञायाः अनुमेयाः प्रतियोधाः प्रतिभटायस्मिन्नोस्मिरजासिरेणोतुमुलं संयामः संग्रामः सं
कुलंयुद्धंअभवत्।तुमुलरणसंकुलमितिविश्वप्रकाशः॥६१॥भल्लेति।सरघुःभल्लापवर्जितैः नैर्वाणविशेषलक्षैतैः स्त्रे

॥संग्रामस्तुमुलस्तस्यपाश्चात्यैरश्वसाधनैः॥शार्ङ्गैः कूजितविज्ञेयप्रतियोधेरजस्यभवत्॥६१॥
॥भल्लापवर्जितस्तेषांशिरोभिः श्मश्रुलैर्महीं॥तस्तारसंघाव्यासैः सक्षौद्रपटलैरिव॥६२॥७॥

हादलफलोमश्मश्रुइतियादवः।श्मश्रुलैप्रवृद्धमुखरोमवद्भिः सिध्मास्यालप्रत्ययः।तेषांपाश्चात्यानां
सिरोभिः सरघाव्याप्तैः सरघामधुमक्षिकेत्यमरः। क्षुद्रासरघाः क्षुद्राव्याघ्रीनटीव्यंगावृत्तीस
रघासुचचांगेरिकायोहिंस्रायांमक्षिकामात्रवद्वयोरितिहेमः। क्षुद्रव्यंगानटीवेश्यासरघामधुमक्षिकेइ
त्यमरः। शार्ङ्गतोक्षुद्राभिः कृतानिक्षौद्राणिमध्वनि। क्षौद्रंमधुनिपातीयेइत्यमरः क्षुद्राभ्रमरवटखादपादेत्यइसंज्ञा
योअत्रप्रत्ययः।तेषांपटलैः संचयैरिवपटलंतिलकेनेत्ररोगछद्मिसंचये पटिकेपरिवारेचेतिहेम।महीभुवंतस्तार
छादयामास॥६२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपनीतेति॥ शीर्षाहताश्चिरस्त्राणाअपसारितस्त्रीर्षण्याः संतः शीर्षकंत्रीर्षण्यं शिरस्त्रमित्यमरः।
रारणागतलक्षणमेतत्॥ तंरघुंरारणंययुः॥ रारणंरक्षणेगृहेवधूरक्षकयोरपीतिहेमः।र
घुरेवरक्षकस्तंप्रतिययावित्यर्थः॥ तथाहिमहात्मनांसंरंभः संक्षोभः प्रणिपातः प्रणिपतिरेव
प्रतिकारोयस्यसहिमहतांपारकार्यमोदृत्यमेवासह्यंतुनेजीवितमितिभावः॥ ६३॥ विनयातइति॥

॥अपनीतशिरस्त्राणाः शीर्षास्तंरारणंययुः॥ प्रणिपातप्रतीकारः संरंभोहिमहात्मनां॥ ६३॥
॥विनयंतेस्मतद्योधाः मधुभिर्विजयश्रमं॥ आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु॥ ६४॥

तस्यरघोर्योधाभट्टा आस्तीर्णान्यजिनरत्नासुनिचर्मश्रेष्ठानानिअजिनंचर्मरुतित्यमरः। रत्नास्यजाति
श्रेष्ठेस्यान्मणावितिहेमः॥ यासुतासुद्राक्षावलयानांद्राक्षामंडपानांभूमिष्वकावोरोसानीद्रोहोइमंये
रः॥ मंडपोवलयस्त्रीत्यमरः। मधुभिर्द्राक्षाफलप्राप्तिकैर्मद्यैर्विजयश्रमंयुद्धखेदंविनयतेस्म।
अपनीतवंतः। कर्त्तरिक्तेचाशरीरेकर्मणीत्यात्मनेपदं। लङ्। इत्मेइतिभूतार्थेलङ्॥ ६४॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भास्याद्विवस्वत्सप्ताश्वहरिदश्वोंऽशुरश्मयः॥

ततः इति॥ रघुर्भास्वान्सूर्य इवरारेर्बाणैरुत्तैः किरणैरिवाकिरणोन्नमयत्रवांश्च गभस्तिर्घृणिर्व
रुचयः॥ इत्यमरः॥ उदीच्यानुदकभवान्नूपान्सरान्उदकानीवरसः स्यादेजलवीर्येश्रृंगारादौ
विषेइवा इतिहैमः॥ उदरिष्यन्कोबेरींकुबेरसंबंधिनीदिशंउदीचींप्रतस्थे॥ अनेकेवत्राद्देनेयमु
पमायथाहदंडी॥ एकानेकक्रियेकत्वात्सवाक्यार्थोपमाद्विधेति॥ ६५॥ विनीतेति॥ सिंधुनामकाश्मी

॥ ततःप्रतस्थेकोबेरीभास्वानिवरघुर्दिशं॥ रारैरुत्तैरिवोदीच्यानुद्धरिष्यान्समानिव॥ ६५॥
॥ जितानजय्यस्तानेवकृत्वाथपुरःसरान्॥ महार्णवमिवोर्वाग्निःप्रविवेशोत्तरापथं॥ ६५॥
॥ विनीताध्वश्रमास्तस्यसिंधुतीरविचेष्टनैः॥ दुधुवुर्वाजिनःस्कंधान्लग्नकुंकुमकेसरान्॥ ६६॥

रदैरोषुकम्रिन्नदविशेषःदेशोतदाविशेषब्योसिंधुर्नासरितःस्त्रियामिइत्यमरः॥ सिंधुर्नघांजगामद्वे
अब्धौदेशेंजनभद्रयोरितिहैमः॥ सिंधोस्तीरेविचेष्टनैरंगपरिवर्त्तनैर्विनीताध्वश्रमास्तस्यरघोर्वा
जिनोऽश्वाः लग्नाः कुंकुमसुकुसुमकेसराः किंजल्काः येषांतान्यद्वालग्नकुंकुमाः कंसराः सटाः
येषांतान्स्कंधान्कायान्स्कंधः प्रकांडेकायेऽसविज्ञानादिषुपंचसुमुच्यसमूहेचेतिहैमः दुधुवुःकंपयतिस्मा॥ ६६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रेति॥तत्रोदीच्यांदिशिभर्तृषुधवेषुधवःप्रियःपतिर्भर्तृइत्यमरः॥व्यक्तविक्रमंभर्तृबधेनस्फुट
पराक्रमइत्यर्थः॥रघुचेष्टितंरघुव्यापारःहूणाःजनपदाःक्षेत्रियास्तेषामवरोधाःअंतःपुरस्त्रि
यःतेषांकपोलेषुगंडस्थलीवीरेपिकटचिह्नयोःकपोलेगंडकेयोगेवाजिभूषणबुद्धइतिहेमः॥
पाटलस्यपाटललिमश्वेतरक्तस्तुपाटलइत्यमरः॥ताडनादिलुताक्ष्ण्यस्यआदेरिउपदेरा

॥तत्रहूणावरोधानांभर्तृषुव्यक्तविक्रमं॥कपोलपाटलादेशिबभ्रवरघुचेष्टितं॥६७॥
॥कांबोजाःसमरेसोढुंतस्यवीर्यमनीश्वराः॥गजालानपरिक्लिष्टैरक्षोटैःसार्धमानताः६८

कंबभ्रव॥अथवापाटलआदेशीआदेयस्ययङ्लुंत्वास्वयंलेख्याप्यतइत्यर्थः॥६७॥कांबोजाइति।
कांबोजाराजानःसमरेसंग्रामेतस्यरघोचार्यैप्रभावंवीर्यंतेजःप्रभावयाः॥शुक्रेरान्तोवेतिहेमः॥
सोढुंमनीश्वराः॥आनम्राःसंतःगजानामाबध्नांबंधनंभावेल्युटिविभाषालीयतेरित्यालं॥
तेनपरिक्लिष्टैः॥परिक्षिप्तैरक्षोटैरक्षवृक्षविशेषैःसार्द्धमानताःबभ्रुवुः॥६८॥ ७॥ ८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषामिति॥तेषांकांबोजानांसदश्वेभ्रियिष्णास्तुंगाःतुगःपुन्नागयोर्वृधेस्यादुन्नतेऽन्यवदितिसज्जनः।
द्रविणानांहिरण्यानां॥हिरण्यद्रविणंधुम्नमित्यमरः॥द्रविणंकांचनेधनेपराक्रमेबलेपिस्यादि
तिहैमः॥राज्ञायःपूजायएवराज्ञिमेषादियुज्ययोगितिहैमः।उपहृउपायनानिउपयनमुपग्रा
ह्यमुपहारस्तथोपदेत्यमरः॥तथाणुस्तेकाःगर्वास्फनविविष्मुः सत्यपिगर्वकारणेनजगर्वित्य
मद्यैः॥६९॥ततइति॥ततोऽनंतरंअश्वसाधनःसन्गोयोगुरुःपितरंगुरुंमहसांगिरसेपित्रा

॥तेषांसदश्वभ्रियिष्णास्तुंगद्रविणराज्ञायः॥विविष्युस्तंविरांनाथमुदन्वंतमिवापगाः॥ ६९॥
॥ततोगो रीगुरुंरोलमारुरोहाश्वसाधनः॥वर्द्धयन्निवतत्कूटानुद्धूतैर्धातुरेणुभिः॥७०॥

दोधर्मदेशेके॥धोअदुर्जरेचापीतिहैमःसेलंहिभवंतंसमुद्धूतैरभ्यधातूनांगैरिकादीनांधातूनार
सादीश्लेष्मादोश्वादिभ्यावग्रोविकारयोःमहाभूतेषुलोकेषुन्नाश्रादाविंद्रियेस्तीतिहैमः॥रेणुभिश्च
लिभिःस्तत्कूटान्स्तस्यशृंगानिकूटवरियत्रयोमायादभारिश्टंगेषुसीरागेवत्तत्तुछयोर्तिश्रलेयोधने
रघ॥वितिहैमः॥वर्द्धयन्निवारुरोहउन्नतद्धूलिर्द्रीनामिरिश्रिरवरद्विपंत्रमोजायतइतिभावः॥७०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राज्ञांसेति॥तुल्यसत्त्वानिसैन्येः समानबलानांसत्त्वद्रव्येगुणेचित्तेव्यवसापश्च भावयोः पिशाचादावि
त्भावेवलेप्राणेषुजंतुदितिहैमः।गुहासुदरीषुरेरतइतीगृहाशयाः।अधिकरणेइतेरित्यप्रत्ययः।
तेषांसिंहानांसंबधि परिवृत्यावलोकितंभावेक्तः शयित्वैवग्रीवाभंगेनावलोकनंदृष्टिकैसैन्यघोषसेना
कलकलेसंध्याप्रकारेणयोरपीतिहैमः।नक्तप्रसज्यप्रतिषेधेपितसुरुषसमासइष्यतेराज्ञांसक
थयांमास॥सैन्येभ्यइत्यर्थाल्लभ्यतेबाह्यदृष्टितंमेवमनोरनुमायकमितिभावः।भ्रमसंभ्रांतत्वेहेतुः।

॥राज्ञांसतुल्यसत्त्वानांसैन्यघोषेष्वसंभ्रमं॥गुहाशयानांसिंहानांपरिवृत्यावलोकितं।७१
॥भर्जेषुमर्मरीभूताः किंचकध्वनिहेतवः॥गंगासीकरिणोमार्गेमरुतस्तांश्चिषेविरे॥७२॥

तुल्यसत्त्वानामिति।नहिसमबलः।समबलाद्बिभेतिइतिभावः।७१॥भर्जेषुइति॥भर्जेषुभूर्जपत्रेषु
भूर्जपत्रोभूर्जोभृट्टुक्कर्मिकामतेतियादवः।मर्मरशुष्कपर्णानांध्वनिरितियादवः।अयंचशुष्क
दिशब्दश्चणिन्यपिवर्ततेप्रसुप्यतेचममरैरगरुधूपसाधभिरितिउन्तोमर्मरीभूताः मर्मशब्दवंतोभू
ताइत्यर्थः।कीचकानांरेणुविश्लेषाणांध्वनिहेतवः श्रोत्रसुखावहाइतिभावः गंगाशीकरिणः गंगायाः
शीकराविद्यंतेएषांतेतथोक्ताः शीतलाइत्यर्थः मरुतोवाताः मार्गेऋतौअयनेवर्त्ममार्गध्वपंथानः पद
वीस्यतिरित्यमरः।तंरघुंश्रिषेविरे॥७२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्रम्रमुरिति॥ सैनिकाः सेनायांसर्मवेताः प्राग्वहतियष्क्प्रत्ययः। नमेरुणांसुरपुन्नागद्रुमाणांनमेरुः सुरपु
न्नागइमरः॥ छायास्थनातपेषु॥ छायापंक्तोप्रतिमायामर्कयोषित्यनतपे॥ उल्कोच्चपालनैकांतोज्ञोभायांच
तमस्यपीतिहेमः॥ निषण्णनां दृषदुपविष्टानांमृगाणांकस्तूरीमृगाणांनाभिः प्राण्यंगेः नाभिक्षेत्रप्रधान
याः चक्रमध्येमृगमदे प्राण्यंगेमुरव्यराज्ञिचेतिहेमः। वासितोत्संगाः सुरभितलाः दृषदः शिलाः पाषाण
प्रस्तरग्रावोपलाश्मानः शिला दृषदित्यमरः॥ अधास्याधिष्ठायविश्रम्रमुर्विश्रांताः॥ ७३॥ सरलेति

॥विश्रम्रमुर्नमेरूणांछायास्वध्यास्यसैनिकाः॥ दृषदोवासितोत्संगानिषण्णम्रगनाभिभिः॥७३॥
॥सरलासक्तमातंगग्रैवेयस्फुरितत्विषः॥ आसन्नौषधयोनेतुर्नक्तमस्नेहदीपिकाः॥७४॥७॥

सरलेषुदेवदारुविशेषेषुआसक्तानियानिमातंगानांगजानांग्रीवासुभवानिग्रैवेयाणिकंठस्थंवला
नि ग्रीवाभ्योण्चेतिअण्प्रत्ययः॥ स्फुरंवलंपुञ्जलीकांच्यांलाहरज्जौबंधनेतिहेमः। तेषुस्फुरत्त्विषः॥
प्रतिफलितमासःऔषधयोनक्तंरात्रेज्वलंतोलताविशेषाः। नेतुर्नायकस्यरघोरस्नेहदीपिकास्तैलनि
रपेक्षाःप्रदीपाःआसन्॥ ७४॥॥श्रीरामजयरामजयजयरामरामरक्षवासुदेवं॥नारायणप्रसन्न॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्येति॥तस्यरघोरुत्सृष्टेषुउज्झितेषुसेनानिवासेषुकंठरज्जुभिर्गजग्रेवेयैः ज्ञताःनिष्पिष्टाःत्वचो
येषांतेद्विपदारवःकिरातैर्वनचरेभ्यःकिरातःस्यादल्पतनोर्भृनिंबम्लेछयोरपिइतिहैमः॥गजानां
वर्ष्मप्रमाणंवर्षदेहप्रमाणयोरित्यमः॥शरांसुःकथितवतःदेवदारुस्कंधत्वक्ज्ञतैर्गजानामीन
त्यमनुमीयतइत्यर्थः॥७५॥तत्रेति॥तत्राहिमाद्रेरघोःपर्वतेभवैःपार्वतीयैःपर्वताछइतिछप्र
त्ययः॥गणैरुत्सवसंकेतारब्धैःसप्तभिःसहगणानुत्सवसंकेतान्जयत्सत्यपांडवइतिमाहभारते॥नार

॥तस्योत्सृष्टनिवासेषुकंठरज्जुज्ञतत्वचः॥गजवर्ष्मकिरातेभ्यःशरांसुर्देवदारवः॥७५॥७॥ ७
॥तत्रयुद्धंरघोर्घोरंपार्वतीयैर्गणैरभूत्॥नाराचक्षेपणीयास्त्रनिष्पेषोल्लसितानलं॥७६॥

चानांकूर्चिकाकृत्तिसायकानांबाणविरोषाणांक्षेपणीयानांभिंडिपालानांपूक्षेपणीयोभिंडिपालःस
मोदीघोमहाफलावितियादवः॥अस्त्रमनांचनिष्पेषेणअन्योन्यसंघर्षणेनोल्लसिताअनलाअ
ग्नयोयस्मिन्नतघोक्तं।घोरंभीमंअन्योन्ययुद्धंभूत्तदाभीषणकृणंभीष्मंघोरंभीमंभयानकंभ
यकरंप्रतिभयंरौद्रंदृर्यमभीत्रीषित्यमरः॥७६॥युद्धमायोधनंजन्यमितिसुरेव॥७॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रारैरिति॥ सरघुः रारैर्बाणैः उत्सवसंकेतान्॥ नामगणान्॥ विरतोत्सवान्॥ हृत्याजित्येत्यर्थः किन्न
रान्॥ बाह्वोः स्वभुजयोर्जयोदाहरणंजयारव्यापकंप्रबंधविषैर्गापयामास। गतिबुद्धित्यादिना।
किंनराणांकर्मत्वंगामंचाभूत्॥ पूर्वराजयध्वन्यते॥ ७७॥ परस्परेणेति॥ तेषुगणेषुउपयन
यक्तानिः पाणयोयेषांतेषुसत्सुपरस्परेणअन्योन्यंराज्ञाहिमवंतः सारोधनरूपोविज्ञातः हिमा

॥ रारैरुत्सवसंकेतान्सहृत्याविरतोत्सवान्॥ जयोदाहरणंबाह्वोर्गापयामासकिन्नरान्॥ ७७॥
॥ परस्परेणविज्ञातस्तेषूपायनपाणिषु॥ राज्ञाहिमवतः सारोराज्ञः सारोहिमाद्रिणा॥ ७८॥
॥ तत्राक्षोभ्यंयशोराशिंनिवेश्यावरुरोहसः॥ पौलस्त्यतुलितस्याद्रेरदधानइवाश्रियं॥ ७९॥

द्रिणाराज्ञः सारोबलरूपोविज्ञातः एतेनतत्रत्यवस्कतानांमनर्घ्यत्वंगुणानांचाभूत्॥ पूर्वःपराजयइति
ध्वन्यते॥ ७८॥ तत्रेति। सधुरस्तत्रहिमादोअक्षोभ्यमप्रतिध्वंयशोराशिंकीर्तिपुंजंनिवेश्यनिधाय
पौलस्त्येनरावणेनतुलितस्याद्रेः कैलासस्यश्रियंलक्ष्मीआदधानइवनयन्निवावरुरोहअवततारकैला
सगमत्वेवप्रतिनिवृत्तइत्यर्थः॥ नहिश्रेष्ठाःपरस्परेणपराजितमभियुंजतइतिभावः॥ ७९॥ ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चकंपयति॥ तस्मिन्नरघोतीर्णलोहित्यात्तानदीयेनतस्मिन्नतीर्णलोहित्येसतिप्राग्ज्योतिषांज
नपदानामीश्वरस्तस्यरघोर्गजानामालानंतांप्राप्तैःकालागरुद्रुमैःसछागरुद्रुमैःसहच
कंपेकंपितवान्। तत्रवेणुकमालानबंधनंस्तंभइत्यमरः॥८०॥नेतिसप्राग्ज्योतिषेश्वरःरुद्धा

॥चकंपेतीर्णलोहित्येतस्मिन्प्राग्ज्योतिषेश्वरः॥तं द्रुजालानतांप्राप्तैःसहकालागरुद्रुमैः॥८०॥
॥नप्रसेहेसरुद्धार्कमेघारावर्षिदुर्दिनं॥रथवर्त्मरजोप्यस्यकुतएवपताकिनीं॥९१॥

मनश्चमं
मिवे

र्कमावर्त्तयत्सूर्यं॥अर्कोद्रुमभेदे। स्फुटिकताम्रेसूर्यविडोजसीतिहेमः॥अधारवर्षंतद्दुर्दिनं
चधारा॥दृष्टिविनादुर्दिनीभूतमस्यरघोः रथवर्त्मरजोपिनप्रसेहे॥तपताकिनींसेनाकुतए
वप्रसेहे॥नकुतोपीत्यर्थः॥ध्वजनीवाहिनीसेनाएतनानीकिनीचभूरित्यर्थः॥मरः॥८४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमीति॥ कामरूपाणांकामदेशानांईश्वराःअत्यारंडलविक्रममतींद्रपराक्रमंतंरघुंभि
नाःभिन्नःश्रमैदाःकटेषुगंडस्थलेषुयेषांतैःनागैर्जैसाधनैर्भज्ञे॥नागांदत्वाहिरण्मं
तइत्यर्थः॥कीदृशैर्यैर्नागैरन्यानुपरुरोध।शूराणामपिशूरो

॥तमीश्वराःकामरूपाणामत्यारंडलविक्रमं॥भेजेभिन्नकटैर्नागैरन्यानुपरुरोधयैः॥८२॥
॥कामरूपेश्वरस्तस्यहेमपीठाधिदेवतां॥रत्नपुष्पोपहारेणछायामानर्चपादयोः॥८३॥

तमोरघुरितिभावः॥८२॥ कामरूपेति॥कामरूपेश्वरोराजाहेमपीठाधिदेवतांहेमपीठस्यक
केनेस्याधिदेवतां॥पीठमासनमित्यमरः॥तस्यरघोःपादयोर्म्मरणयोर्म्मणयां॥पादःपादांघ्रिरंघ्रिणा
सियामित्यमरः॥कनकमयपादपीठव्यापिनीःपादकांतिरत्नान्येवपुष्पाणितेषामुपहारेणसमर्पणेना
र्चं॥अर्चयामास॥८३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतीति॥जिष्णुजयनशीलः ग्लाजिस्थश्नुक्रुशीति क्नुप्रत्ययः॥सरघुरिति इदंदिग्योजित्वार
थैरुद्धतंरजः छत्रशून्येषुरथोरेकछत्रत्वादितिभावः॥राज्ञांमौलिषुकिरीटेषुवाम्बिलेषु॥
मौलिःकिरीटेधम्मिलेचूडकंकलमर्द्विषितिहेमः॥अथमुकुटंकिरीटंनपुंसकमित्य
धम्मिलसंयताःकाचाइत्यमरः॥विश्रामयन्संक्रामयन्॥इत्यर्थः॥८४॥सइति॥सरघुः

॥इतिजित्वादिग्योजिष्णुर्न्यवर्त्ततरथोद्धतं॥रजोविश्रामयन्राज्ञांछत्रशून्येषुमौलिषु॥८४
॥सविश्वजितमारेभेयज्ञंसर्वस्वदक्षिणं॥आदानंहिविसर्गायसतांवारिमुचामिव॥८५॥

स्वयूरः सर्वस्वंधनंयस्यांनिजेधनेइतिहेमः॥दक्षिणायज्ञदानंयस्यतंसर्वस्वदक्षिणादिक्प्रतिष्ठायज्ञदानमितिहेमः॥
विश्वजित्सर्वस्वदक्षिणइतिश्रुतेः॥विश्वजितंनामयज्ञंआरेभेआजहेक्रतवान्इत्यर्थः॥युक्तंचैतदित्याह॥
सतांसाधूनांवारिमुचांमेघानांमिवादानंमार्जनंविसर्गायत्यागायहिपात्रविनियोगायेत्यर्थः॥अ
त्रकामंदकः॥न्यायेनार्जनमर्थस्यरक्षणं॥व्यसनंतथा॥तत्रात्रविश्वजिराजविन्नचतुर्विधोमिति॥८५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्रांत इति॥ काकुत्स्थेरघुः सत्रांतेयज्ञांतेसत्रमाघदनेयज्ञेसदादानेधनेपिचेत्यमरः। सचिवा नामात्यानांसचिकोभ्टतकेऽमात्यइतिहेमः। सरवाइतिसचिवसरवः सन्नतेषामन्यताऽनुसर णद्योतनार्थंराज्ञः सचिवव्यपदेशः॥ राजाहुः सखिभ्यष्टच्इतिसमासांतटच्प्रत्ययः। गु र्वीभिर्महतीभिः पुरस्क्रियाभिः पूजाभिः रामितंपराजयैर्व्यलीकंदुः खंवैलक्ष्यंण्येवातद्यो

॥सत्रांतेसचिवसरवः पुरस्क्रियाभिर्गुर्वीभिः रामितपराजयव्यलीकान्॥
॥काकुत्स्थश्चिरविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेतुमेने॥८६॥

षांतान्॥ वैलक्ष्यंण्येव्यलीकेचदुःखमितियादवः॥ चिरविरहेणउत्सुकाउत्कंठिताअवरोधामतः पुरांगनायेषांतान्राज्ञीपत्यानिराजन्याः क्षत्रियास्तान्॥ राजश्वसुराघदितियत्प्रत्ययः॥ मूर्ध्ना भिषिक्तोराजन्योबाहुजक्षत्रियोविराडित्यमरः॥ स्वपुरंनिवृत्तयेप्रतिगमनायानुमेनेअ नुज्ञातवान्॥८६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रघु टी
गम २॥

तइति॥तेराजानोरेखा एवध्वजाश्चकुलिशातपत्राणिचध्वजो घोकारोरेरेखाइत्यर्थः।तानिचि
क्रानियस्यतथोक्तंप्रसादेनैवलभ्यंसम्राजः सार्वभौमस्यरघोश्चरणयुगंप्रणमनेप्रणमसमये
याःप्रणतयःनमस्काराः तानिकरेणअंगुलीषुमौलिषुकेशबंधिषुयाःस्रजोमाल्यानिताभ्य
श्चुतैर्मकरंदरेणुभिः वामकरंदैःपुष्पसरैः।मकरंदःपुष्पसरइत्यमरः।रेणुभिः।परा

॥तेरेखाध्वजकुलिशातपत्रचिह्नंसम्राजश्चरणयुगंप्रसादलभ्यं॥ ॥राम॥
॥प्रस्थानप्रणतिभिरंगुलीषुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं॥८९॥जय॥
॥इतिरघुवंशेमहाकाव्येकालिदासकृतौदिग्विजयोनामचतुर्थसर्गः॥८॥राम॥

गैम्रपरागः सुमनोरजइत्यमरः॥गौरंगौरवर्णंचक्रुः॥८७॥इतिश्रीपदवाक्यप्रमाणपारावारी
णश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांरघुवंशव्याख्यायांसंजीवनीस
मारव्यायांरघुदिग्विजयोनामचतुर्थःसर्गः॥४॥विश्वेश्वरार्पणमस्तु॥कोलमेरवप्रसन्न॥॥

राम
२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इतिरघुवंशसमाप्तः॥ राम॥

हेपोथिबाबंभनपुराणिकूआचार्य॥ परोपकारार्थमिदंलिखीतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.12.19 16:21
,TRANSFERRED=2019/12/26 at 16:28:26
,PAGES=46
,TYPE=STD
,NAME=S0002398
,Book Name=M-2424-RAGHUVANSH PRARAMBH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection